॥ श्रीः ॥

माथुरी पञ्चलक्षणी

सिंहव्याघ्रलक्षणसहिता

श्रीमन्महामहोपाध्यायमथुरानाथ-
भट्टाचार्यविरचिता

काश्यां

राजराजेश्वरीनाम्नि मुद्रायन्त्रालये
संमुद्रिता ।

सं० १९५५

॥ श्रीः ॥

माथुरी पञ्चलक्षणी ॥

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः, न तावदव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वम् ।

प्रथम लक्षण

श्रीगणेशायनमः ॥ अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणमारभते ॥ नन्वित्यादिना ॥ अनुमितिरित्यस्यानुमाननिष्ठप्रामाण्यानुमितिरित्यर्थः । व्याप्तिज्ञानइत्यत्र च विषयत्वं सप्तम्यर्थः तथा चानुमितिनिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयीभूता व्याप्तिः केत्यर्थः । अनुमाननिष्ठप्रामाण्यानुमितिहेतित्यनेन व्याप्तेरनुमानप्रामाण्योपपादकत्वकथनादनुमानप्रामाण्यनिरूपणानन्तरं व्याप्तिनिरूपणे उपोद्घातएव सङ्गतिरिति सूचितामित्याहुः । उपपादकत्वं चात्र ज्ञापकत्वम् । केचित्तु अनुमितिपदमनुमितिनिष्ठेतरभेदानुमितिपरम् । तथा चानुमितिनिष्ठभेदानुमितौ यो हेतुः प्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वरूपः तद्घटकं यद्व्याप्तिज्ञानं तदंशे विशेषणीभूता व्याप्तिः केत्यर्थः घटकत्वार्थकसप्तमीतत्पुरुषसमासात्, तथा च प्रागुक्तानुमितिलक्षणे उपोद्घातएव संगतिरत्र सूचितेत्याहुः ॥ न तावदिति ॥ अव्यभिचरितत्व,मव्यभिचरितत्वशब्दप्रतिपाद्यम् । तत्र हेतुमाह । तद्धीति । हि यस्मात्तदव्यभिचरितत्वं नेति सर्वत्र संबध्यते । तथा च व्याप्तिर्यतः साध्याभाववदवृत्तित्वादिरूपाभिचारितत्वशब्दप्रतिपाद्यस्वरूपा न अतोऽव्यभिचारितत्वशब्दप्रतिपाद्यस्वरूपा नेत्यर्थः पर्यवसितः । विशेषा-

भावकूटस्य सामान्याभावहेतुताप्रसिद्धेश्चेति न नञ्द्वयोपादानमनर्थकमिति विभावनीयम् । साध्याभाववदवृत्तित्वमिति । वृत्तं वृत्ति भावे निष्ठाप्रत्ययात् । वृत्तस्याभावोऽवृत्तम् । वृत्त्यभाव इति यावत् । साध्याभाववतोऽवृत्तं साध्याभाववदवृत्तं तद्यत्रास्ति तत्साध्याभाववदवृत्ति मत्वर्थीयेनप्रत्ययात्, तस्य भावः साध्याभाववदवृत्तित्वम् । तथा च साध्याभाववदवृत्त्यभाववत्त्वमिति फलितोऽर्थ इति प्राञ्चः । तदसत् । न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर इत्यनुशासनविरोधात् । तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वात् तच्चागुणवत्त्वमिति साधर्म्यव्याख्यानावसरे गुणप्रकाशरहस्ये दीधितिरहस्ये च स्फुटम् । अव्ययीभावसमासोत्तरपदार्थेन समं तत्समासानिविष्टपदार्थान्तरान्वयस्याव्युत्पन्नत्वात् । भूतलोपकुम्भं भूतलाघटमित्यादौ च भूतलवृत्तिघटसमीपतदत्यन्ताभावयोरप्रतीतेः । एतेन वृत्तेरभावोऽवृत्तीत्यव्ययीभावानन्तरं साध्याभाववतो वृत्तिर्यत्रेति बहुव्रीहिरित्यादि प्रत्युक्तम् । वृत्तौ साध्याभाववतोऽन्वयानुपपत्तेः । अव्ययीभावसमासस्यापि अव्ययतया तेन समं समासान्तरासम्भवाच्च । नञ उपाध्यादिरूपाव्ययविशेषाणामेव समस्यमानत्वेन परिगणितत्वात् । वस्तुतस्तु साध्याभाववतो न वृत्तिर्यत्रेति त्रिपदव्यधिकरणबहुव्रीह्युत्तरं त्वप्रत्ययः साध्याभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः अन्वयश्चास्य वृत्तौ । तथा च साध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वमव्यभिचारितत्वमिति फलितम् । न च व्यधिकरणबहुव्रीहि-

श्च न सर्वत्र साधुरिति वाच्यम् । अयं हेतुः साध्याभाववदवृत्तिरित्यादौ व्यधिकरणबहुव्रीहिं विना गत्यन्तराभावेनात्रापि व्यधिकरणबहुव्रीहेस्साधुत्वात् । साध्याभावाधिकरणवृत्त्यभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः । तेन धूमवान्वन्हेरित्यादौ धूमाभाववज्जलहृदादिवृत्त्यभावस्य धूमाभाववद्वृत्तित्वजलत्वोभयत्वाद्यवच्छिन्नाभावस्य च वन्हौ सत्वेपि नातिव्याप्तिः । साध्याभाववद्वृत्तिश्च हेतुतावच्छेदकसम्बन्धेन विवक्षणीया तेन वन्ह्यभाववति धूमावयवे जलहृदादौ समवायकालिकविशेषणतादिना धूमस्य वृत्तावपि न क्षतिः । साध्याभावः साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः । तेन वन्हिमान् धूमादित्यादौ समवायादिसम्बन्धेन वन्हिसामान्याभाववति संयोगसंबन्धेन तत्तद्वन्हित्ववन्हिजलोभयत्वावच्छिन्नाभाववति च पर्वतादौ संयोगेन धूमस्य वृत्तावपि न क्षतिः । ननु तथापि गुणत्ववान् ज्ञानत्वात्, सत्तावान् जातेरित्यादौ विषयित्वाव्याप्यत्वादिसम्बन्धेन तादृशसाध्याभाववति ज्ञानादौ ज्ञानत्वजात्यादेर्वर्त्तमानत्वादव्याप्तिः । न च साध्याभावाधिकरणत्वमभावीयविशेषणताविशेषेण विवक्षितमिति वाच्यम् । तथा सति घटत्वात्यन्ताभाववान्घटान्योन्याभाववान्पटत्वादित्यादौ साध्याभावस्य घटत्वादेर्विशेषणताविशेषत्वसम्बन्धेनाधिकरणाप्रसिद्ध्याव्याप्तिरिति चेन्न । साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरण-

त्वस्य विवक्षितत्वात् । वृत्यन्तं प्रतियोगिताविशेषणम् । तादृशसम्बन्धश्च वन्हिमान् धूमादित्यादिभावसाध्यकस्थले विशेषणताविशेष एव । घटत्वात्यन्ताभाववान्पटत्वादित्याद्यभावसाध्यकस्थले तु समवायादिरेव । समवायविषयित्वादिसम्बन्धेन प्रमेयादिसाध्यके ज्ञानत्वादिहेतौ साध्यतावच्छेदकसमवायादिसम्बन्धावच्छिन्नप्रमेयाद्यभावस्य कालिकादिसम्बन्धेन यो ऽभावः सोपि प्रमेयतया साध्यान्तर्गतः तदीयप्रतियोगितावच्छेदककालिकादिसम्बन्धेन साध्याभावाधिकरणे ज्ञानत्वादेर्वृत्तेरव्याप्तिवारणाय सामान्यपदोपादानम् । साध्यसामान्यीयत्वं च यावत्साध्यनिरूपितत्वं स्वानिरूपकसाध्यकाभिन्नत्वमिति यावत् । अस्यैकोक्तिमात्रपरतया गौरवस्यादोषत्वात् कारणतावच्छेदके च भावसाध्यकस्थले अभावीयविशेषणताविशेषेण साध्याभावाधिकरणत्वमभावसाध्यकस्थले च यथायथं समवायादिसम्बन्धेन साध्याभावाधिकरणत्वमुपादेयम् । साध्यसाधनभेदेन कार्यकारणभावभेदात् । न च तथापि घटान्योन्याभाववान्पटत्वादित्यादावन्योन्याभावसाध्यकस्थले घटत्वादिरूपे साध्याभावेन साध्यप्रतियोगित्वं न वा समवायादिसम्बन्धस्तदवच्छेदकः तादात्म्यस्यैव तदवच्छेदकत्वादित्यव्याप्तिस्तदवस्थेति वाच्यम् । अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वेन घटभेदस्य घटभेदात्यन्ताभावत्वावच्छिन्नाभावरूपतया घटभेदात्यन्ताभावरूपस्य प्रतियोगितावच्छेदकीभूतघटत्वस्यापि समवायसम्बन्धेन घटभेदप्रतियोगित्वात् । न चान्यत्रात्यन्ताभावाभावस्य प्रति-

योगिरूपत्वेपि घटभेदात्यन्ताभावाभावो न घटादिभेदरूपः किन्तु प्रतियोगितावच्छेदकीभूतघटत्वात्यन्ताभावरूप एवेति सिद्धान्त इति वाच्यम् । यथाहि घटत्वावच्छिन्नघटवत्ताग्रहे घटात्यन्ताभावाग्रहाद् घटात्यन्ताभावाभावव्यवहाराच्च घटात्यन्ताभावाभावो घटरूपस्तथा घटभेदवत्ताग्रहे घटभेदात्यन्ताभावाग्रहात् घटभेदात्यन्ताभावाभावव्यवहाराच्च घटभेदएव तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभाव इति,तादृशसिद्धान्तो न युक्तिसहः । विनिगमकाभावेनापि घटत्वत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववद्घटभेदस्यापि घटभेदात्यन्ताभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्त्यापत्तेः (न वान्योन्याभावप्रतियोगितावच्छेदके तल्लक्षणस्यातिव्याप्त्यापत्तिः इष्टापत्तेः)। न चैवं घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वापत्तिरिति वाच्यम् । तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपत्वाभ्युपगमात् । तद्वत्ताग्रहे तादृशतदत्यन्ताभावाभावस्यैव व्यवहारात् । उपाध्यायैर्घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वाभ्युपगमाच्च । न चैवं साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विवक्ष्यतां किं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तित्वस्य प्रतियोगिताविशेषणत्वेनेति वाच्यम् । कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः । कालिकसम्बन्धावच्छिन्न-

साध्याभावस्य विशेषणताविशेषसम्बन्धेन यो ऽभावस्तस्यापि साध्यरूपतया कालिकसम्बन्धवद्विशेषणताविशेषोपि साध्यीयप्रतियोगितावच्छेदकसम्बन्धस्तेन सम्बन्धेनात्मत्वप्रकारकप्रमाविशेष्यत्वरूपसाध्याभाववत्यात्मनि हेतावात्मत्वस्य वृत्तेः प्रतियोगितावच्छेदकवत्प्रतियोग्यपि अन्योन्याभावाभावस्तेन तादात्म्यसंबन्धेन साध्यतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यीयप्रतियोगित्वस्य नाप्रसिद्धिः। इत्थं चात्यन्ताभावत्वानिरूपितत्वेनापि साध्यसामान्यीयप्रतियोगिता विशेषणीया। अन्यथा घटान्योन्याभाववान्घटत्वादित्यादावव्याप्त्यापत्तेः। तादात्म्यसम्बन्धस्यापि निरुक्तसाध्याभाववृत्तिसाध्यीयप्रतियोगितावच्छेदकत्वात्। यद्वा साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयनिरुक्तप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विवक्षणीयम्। वृत्त्यन्तमन्यतरविशेषणम्। एवं च घटान्योन्याभाववान् पटत्वादित्यादौ साध्याभावस्य घटत्वादेः साध्यप्रतियोगित्वविरहेपि न क्षतिः। तादृशान्यतरस्य प्रतियोगितावच्छेदकत्वस्यैव तत्र सत्वात्। न च तथापि कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यके सद्धेतावव्याप्तिरिति वाच्यम्। निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या निरुक्तसंसर्गकनिरवच्छिन्नाधिकरणता तदाश्रयावृत्तित्वस्य विवक्षितत्वात्। गुणकर्मान्यत्वविशिष्टसत्वाभाववान्गुणत्वादित्यादौ सत्वात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृत्तित्वेपि साध्याभावत्वाविशिष्टनिरूपिता-

धिकरणत्वस्य गुणाद्यवृत्तित्वान्नाव्याप्तिः। न चैवं कपिसं-
योगाभाववान्सत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिक-
रणत्वाप्रसिध्या ऽव्याप्तिरिति वाच्यम्। केवलान्वयिन्य-
भावादित्यनेन ग्रन्थकृतैवास्य दोषस्य वक्ष्यमाणत्वात्। न
च तथापि कपिसंयोगिभिन्नं गुणत्वादित्यादौ निरवच्छि-
न्नसाध्याभावाधिकरणत्वाऽप्रसिध्या ऽव्याप्तिः, अन्यो-
न्याभावस्य व्याप्यवृत्तितानियमवादिनये तस्य केवलान्व-
य्यनन्तर्गतत्वादिति वाच्यम्। अन्योन्याभावस्य व्याप्यवृत्ति-
तानियमवादिनये अन्योन्याभावात्यन्ताभावस्य प्रतियोगि-
तावच्छेदकस्वरूपत्वेपि अव्याप्यवृत्तिमदन्योन्याभावाभा-
वस्य व्याप्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपगमात्। त-
च्चाग्रे स्फुटीभविष्यति। ननु तथापि समवायादिना गग-
नादिहेतुके इदं वन्हिमद्गगनादित्यादावतिव्याप्तिः। वन्ह्य-
भाववति हेतुतावच्छेदकसमवायादिसंबन्धेन गगनादेरवृ-
त्तेः। न च तल्लक्ष्यमेव हेतुतावच्छेदकसंबन्धेन पक्षधर्मत्वा-
भावाच्चासद्धेतुत्वव्यवहार इति वाच्यम्। तत्रापि व्याप्ति-
भ्रमेणैवानुमितेरनुभवसिद्धत्वादन्यथा धूमवान्वन्हेरित्यादे-
रपि लक्ष्यस्य सुवचत्वात्। एवं द्रव्यं गुणकर्मान्यत्वविशिष्ट-
सत्वादित्यादावप्यव्याप्त्यापत्तिः। विशिष्टसत्वस्य केवलस-
त्तानातिरेकितया द्रव्यत्वाभाववत्यपि गुणादौ तस्य वृत्तेः। गुणे
गुणकर्मान्यत्वविशिष्टसत्तेति प्रतीतेस्सर्वसिद्धत्वात्। सत्ता-
वान् द्रव्यत्वादित्यादावव्याप्तिश्च। सत्ताभाववति सामा-
न्यादौ हेतुतावच्छेदकसमवायसम्बन्धेन वृत्तेरप्रसिद्धेरिति
चेन्न। हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणताप्रतियोगिकहे-

तुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धेन निरुक्तसाध्याभावत्वविशिष्टनिरूपितनिरुक्तसंसर्गकनिरवच्छिन्नाधिकरणताश्रयवृत्तित्वसामान्याभावस्य विवक्षितत्वात्। वृत्तिश्च न हेतुतावच्छेदकसम्बन्धेन विवक्षणीया। अस्ति च सत्तावान् द्रव्यत्वादित्यादौ सत्ताभावाधिकरणतावद्वृत्तेर्हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धेन सामान्याभावो द्रव्यत्वादौ, हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावाधिकरणतावद्वृत्तित्वाभावस्य व्यधिकरणसम्बन्धावच्छिन्नाभावतया संयोगसम्बन्धावच्छिन्नगुणाभावादेरिव केवलान्वयित्वात्। द्रव्यं सत्त्वादित्यादौ च द्रव्यत्वाभावाधिकरणगुणादिवृत्तित्वस्यैव समवायावच्छिन्नाधेयतानिरूपिताविशेषणतासंबन्धेन सत्तायां सत्वान्नातिव्याप्तिः। द्रव्यं विशिष्टसत्वादित्यादावव्याप्तेर्वारणाय प्रतियोगिकान्तमाधेयताविशेषणम्। वस्तुतस्त्वेतल्लक्षणकर्तृनये विशिष्टसत्त्वं विशिष्टनिरूपिताधारतासम्बन्धेनैव द्रव्यत्वव्याप्यं न तु समवायसम्बन्धेन, तथा च प्रतियोगिकान्तमाधेयताविशेषणमनुपादेयमेव। तदुपादाने हेतुतावच्छेदकभेदेन कार्यकारणभावभेदापत्तेः। हेतुतावच्छेदकसंबन्धेन संबन्धित्वे सतीत्यनेनापि विशेषणीयत्वाद्वन्हिमान्गगनादित्यादौ नातिव्याप्तिः। ननु तथाप्युभयत्वमुभयत्रैव पर्याप्तं न त्वेकत्रेति सिद्धान्तादेकघटत्ववान् घटपटोभयत्वादित्यादौ पर्याप्त्यात्मकसम्बन्धेनोभयत्वहेतुकेऽतिव्याप्तिः घटत्वाभा-

साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् ।

नवति हेतुतावच्छेदकसम्बन्धेन हेतोरवृत्तेः घटो न घटपटोभयमिति वत्पटे न घटपटोभयमिति प्रतीतेरिति चेन्न । तादृशसिद्धान्तादेः हेतुतावच्छेदकसम्बन्धेन साध्यसमानाधिकरणत्वे सतीत्यनेनैव विशेषणीयत्वात् । अत एवोक्तं निविशतां वा वृत्तिमत्त्वं साध्यसमानाधिकरणत्वं वेति केवलान्वयिग्रन्थे दीधितिकृता । केचित्तु निरुक्तसाध्याभावत्वविशिष्टनिरूपिताया विशेषणतासम्बन्धेन यथोक्तसम्बन्धेन वा निरवच्छिन्नाधिकरणता तदाश्रयव्यक्त्यवर्तमानं हेतुतावच्छेदकं यत्सम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्यं तद्धर्मवत्त्वं विवक्षितम् । धूमवान्वन्हेरित्यादौ पर्वतादिनिष्ठवन्ह्यधिकरणत्वस्य व्यक्तेर्धूमाभावाधिकरणावृत्तित्वेऽपि अयोगोलकनिष्ठवन्ह्यधिकरणताव्यक्तेरतथात्वान्नातिव्याप्तिरित्याहुः । अन्ये तु हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नस्वाधिकरणताश्रयवृत्ति यन्निरवच्छिन्नाधिकरणत्वं तदवृत्तिनिरुक्तसाध्याभावत्वविशिष्टनिरूपितयथोक्तसम्बन्धावच्छिन्नाधिकरणताकत्वमिति विशेषणविशेष्यभावव्यत्यासे तात्पर्यं, स्वपदं हेतुपरम् । इत्थं च कपिसंयोगाभाववान्सत्वादित्यादौ कपिसंयोगिभिन्नं गुणत्वादित्यादावपि नाव्याप्तिरित्याहुरिति संक्षेपः ॥ लक्षणान्तरमाह । साध्यवद्भिन्नेति । साध्यवद्भिन्नो यस्साध्याभाववान् तदवृत्तित्वमित्यर्थः । कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यके ऽव्याप्तिवारणाय

साध्यवद्भिन्नेति साध्याभाववतो विशेषणमिति प्राञ्चः । तदसत् । साध्याभाववदित्यस्य व्यर्थत्वापत्तेः साध्यवद्भिन्नावृत्तित्वमित्यस्यैव सम्यक्त्वात् । नव्यास्तु साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमिति सप्तमीतत्पुरुषोत्तरं मतुप्प्रत्ययः । तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः । एवं च साध्यवद्भिन्नवृत्तीत्यनुक्तौ संयोगी द्रव्यत्वादित्यादावव्याप्तिः । साध्याभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः ।तदुपादाने च संयोगवद्भिन्नवृत्तिसंयोगाभावः गुणादिवृत्तिसंयोगाभाव एव अधिकरणभेदेनाभावभेदात् तद्वद्वृत्तित्वाभावान्नाव्याप्तिः । न च तथापि साध्यवन्नावृत्तित्वमित्येवास्तु किं साध्याभाववदित्यनेनेति वाच्यम् । यथोक्तलक्षणे तस्याप्रवेशेन वैयर्थ्याभावात् तस्यापि लक्षणान्तरत्वात् । न च तथापि साध्यवद्भिन्नवृत्तिर्यस्तद्वदवृत्तित्वमेवास्तु किं साध्याभावपदेनेति वाच्यम् । तादृशद्रव्यत्वादिमद्वृत्तित्वादसम्भवापत्तेः । साध्याभावेत्यत्र साध्यपदमप्यत एव द्रव्यत्वादेरपि द्रव्यत्वाभावाभावत्वाद्भावरूपाभावस्य चाधिकरणभेदेन भेदाभावात् । ननु घटाकाशसंयोगघटत्वान्यतराभाववान् गगनत्वादित्यत्र घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगाभावस्य गगने सत्वात्सद्धेतुत्वादव्याप्तिः । साध्यवद्भिन्ने घटे वर्तमानस्य साध्याभावस्य घटाकाशसंयोगान्यतरस्वरूपस्य गगनेपि सत्वात्तत्र च हेतोर्वृत्तेः । न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववत्वं विवक्षितमिति वाच्यम् । साध्याभावपदवैयर्थ्यापत्तेः । साध्यवद्भिन्नवृत्तित्वविशिष्टवदवृत्ति-

त्वस्यैव सम्यक्त्वादिति चेन्न । अभावाभावस्यातिरिक्त-त्वमतेनैतल्लक्षणकरणात् । तथा चाधिकरणभेदेनाभावभे-दात्साध्यवद्भिन्ने घटे वर्तमानस्य साध्याभावस्य प्रतियो-गिव्यधिकरणस्य प्रतियोगिमति गगने ऽसत्वादव्याप्तेर-भावात् । न चैवं साध्याभावेत्यत्र साध्यपदवैयर्थ्यं अ-भावाभावस्यातिरिक्तत्वे तद्द्रव्यत्वादेरभावाभावात्सा-ध्यवद्भिन्नवृत्तिघटाभावादेस्तु हेतुमत्यसत्वादधिकरणभेदेना-भावभेदादिति वाच्यम् । यत्र प्रतियोगिसमानाधिकरण-त्वप्रतियोगिव्यधिकरणत्वलक्षणाविरुद्धधर्माध्यासस्तत्रैवाधि-करणभेदेनाभावभेदाभ्युपगमो न तु सर्वत्र, तथा च सा-ध्यवद्भिन्नवृत्तिघटाभावादेर्हेतुमत्यपि सत्वादसम्भववारणाय साध्यपदोपादानात् । यद्वा घटत्वघटाकाशसंयोगान्यतरा-भावाभावोतिरिक्तः घटाकाशसंयोगघटत्वादीनामननुगतत-या तथात्वस्य वक्तुमशक्यत्वात् घटत्वद्रव्यत्वाद्यभावाभा-वस्तु नातिरिक्तः घटत्वद्रव्यत्वादीनामप्यनुगतत्वात् । तथा च द्रव्यत्वादिकमादायासम्भववारणायैव साध्यपदमित्य-न्यत्र विस्तरः ॥ साध्यवत्प्रतियोगिकान्योन्याभावेतिहेतौ साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणवृत्तित्वाभाव इ-त्यर्थः । अन्योन्याभावश्च प्रतियोग्यवृत्तित्वेन विशेषणी-यः तेन साध्यवतो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिता-कान्योन्याभाववति हेतोर्वृत्तावपि नासम्भवः । नन्वेवम-पि नानाधिकरणसाध्यके वन्हिमान्धूमादित्यादौ साध्या-धिकरणीभूततद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्या-भाववति हेतोर्वृत्तेरव्याप्तिर्दुर्वारा प्रतियोग्यवृत्तित्वमपहाय

साध्यवत्प्रतियोगिताकान्योन्याभावासामानाधिकरण्यं॥ सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्॥

साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणे तु पञ्चमेन सह पौनरुक्त्यमिति चेन्न । वक्ष्यमाणकेवलान्वय्यव्याप्तिवदस्याप्यत्र दोषत्वात् । न च तथापि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैवैतल्लक्षणघटकत्वे वक्ष्यमाणकेवलान्वय्यव्याप्तिरत्रासङ्गता केवलान्वयिसाध्यकेपि साध्याधिकरणीभूततद्व्यक्तित्वावच्छिन्नान्योन्याभावस्य प्रसिद्धत्वादिति वाच्यम् । तत्रापि तादृशान्योन्याभावस्य प्रसिद्धत्वेपि तद्वति हेतोर्वृत्तेरव्याप्तेर्दुर्वारत्वात् । यद्वा साध्यवत्प्रतियोगिकान्योन्याभावपदेन साध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाव एव विवक्षितः । न चैवं पञ्चमो भेदः, तत्र साध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाववत्वेन प्रवेशोत्र तु तादृशाधिकरणत्वेनेति अधिकरणत्वप्रवेशाप्रवेशाभ्यामेव भेदात् । अखण्डाभावघटकतया च नाधिकरणत्वांशस्यात्र वैयर्थ्यमिति न कोपि दोष इति दिक्॥ सकलेति। साकल्यं साध्याभाववतो विशेषणम्।तथा च यावन्ति साध्याभावाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतोर्व्याप्तिरित्यर्थः । धूमाद्यभाववद् ह्रदादिनिष्ठाभावप्रतियोगित्वाद्वन्ह्यादेरतिव्याप्तिरिति । यावादिति साध्याभाववतो विशेषणम्॥ साध्याभावविशेषणत्वे तत्तद्ध्रदाद्यवृत्तित्वादिरूपेण यो वन्ह्यभावस्तस्यापि सकलमध्यप्रवेशाद्यावद-

धिकरणाप्रसिद्ध्या ऽसम्भवापत्तेः। न च द्रव्यं सत्वादित्यादौ द्रव्यत्वाभाववति गुणादौ सत्तादेर्विशिष्टाभावादिसत्वादतिव्याप्तिरिति वाच्यम्। तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकत्वस्यैव विवक्षितत्वात्। प्रतियोगिता च हेतुतावच्छेदकसम्बन्धेन विवक्षणीया। तेन द्रव्यत्वाद्यभाववति गुणादौ सत्वादेः संयोगादिसंबन्धावच्छिन्नाभावसत्वेपि नातिव्याप्तिः। साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः। अन्यथा पर्वतादेरपि वन्ह्यादेर्विशिष्टाभावादिसत्वेन समवायादिसंबन्धावच्छिन्नवन्ह्यादिसामान्याभाववत्वेन च यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावाद्धूमस्यासम्भवात्। न च कपिसंयोग्येतद्वृक्षत्वादित्यादौ वृक्षस्यापि तादृशसाध्याभाववत्वेन यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावादेतद्वृक्षत्वस्याव्याप्तिरिति वाच्यम्। किंचिदनवच्छिन्नायास्साध्याभावाधिकरणताया इह विवक्षितत्वात्। इत्थं च किंचिदनवच्छिन्नायाः कपिसंयोगाभावाधिकरणताया गुणादावेव सत्वात्तत्र हेतोरप्यभावसत्वान्नाव्याप्तिः। न च कपिसंयोगाभाववान्सत्वादित्यादौ साध्याभावस्य कपिसंयोगादेर्निरवच्छिन्नाधिकरणत्वाप्रसिद्ध्या ऽव्याप्तिरिति वाच्यम्। केवलान्वयिन्यभावादित्यनेन ग्रंथकृतैवास्य दोषस्य वक्ष्यमाणत्वात्। न च पृथिवी कपिसंयोगादित्यादौ पृथिवीत्वाभाववति यावत्येव कपिसंयोगाभावसत्वादतिव्याप्तिरिति वाच्यम्। तन्निष्ठपदेन तत्र निरवच्छिन्नवृ-

त्तिमत्त्वस्य विवक्षितत्वात् । इत्थं च पृथिवीत्वाभावाधिकरणे जलादौ यावदन्तर्गते निरवच्छिन्नवृत्तिमानभावो न कपिसंयोगाभावः किं तु घटत्वाद्यभाव एव तत्प्रतियोगित्वस्य हेतावसत्त्वान्नातिव्याप्तिः । न चैवमन्योन्याभावस्य व्याप्यवृत्तितानियमनये द्रव्यत्वाभाववान् संयोगवद्भिन्नत्वादित्यादेरपि सद्धेतुतया ऽव्याप्तिः संयोगवद्भिन्नत्वाभावस्य संयोगस्य निरवच्छिन्नवृत्तेरप्रसिद्धेरिति वाच्यम् । अन्योन्याभावस्य व्याप्यवृत्तितानियमनये ऽन्योन्याभावस्याभावो न प्रतियोगितावच्छेदकरूपः किन्त्वतिरिक्तो व्याप्यवृत्तिरन्यथा मूलावच्छेदेन कपिसंयोगिभेदाभावभानानुपपत्तेरिति संयोगवद्भिन्नत्वाभावस्यापि निरवच्छिन्नवृत्तिमत्त्वात् । वस्तुतस्तु सकलपदमत्राशेषपरं एतद्घटत्वाभाववान्पटत्वादित्याद्येकव्यक्तिपक्षके साध्याभावाधिकरणस्य यावत्त्वाप्रसिद्ध्या ऽव्याप्त्यापत्तेः । तथा च किंचिदनवच्छिन्नाया निरुक्तसाध्याभावाधिकरणताया व्यापकीभूतो यो ऽभावः हेतुतावच्छेदकं तत्संबंधावच्छिन्नतत्प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वं लक्षणार्थः । न च सत्तादिसामान्याभावस्यापि प्रमेयत्वादिना निरुक्तसाध्याभावाधिकरणताव्यापकत्वाद्द्रव्यं सत्त्वादित्यादावतिव्याप्तिः । तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं व्यापकत्वमित्युक्तौ तु निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादावव्याप्तिः । निर्वह्नित्वाभावानां वन्हिव्यक्तीनां सर्वासामेव चालनीन्यायेन निर्धूमत्वाभावाधिकरणतावन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वादिति

साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात्। इति चिंतामणौ ॥

वाच्यम् । तादृशाधिकरणताव्यापकतावच्छेदकं हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्वस्य विवक्षितत्वात् । व्यापकतावच्छेदकत्वं तु तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वं वा प्रकृतव्यापकतायां प्रतियोगिवैयधिकरण्यस्य निरवच्छिन्नत्वस्य वा प्रवेशे प्रयोजनाविरहात् । तेन पृथिवीसंयोगादित्यादौ नातिव्याप्तिः। कपिसंयोगाभावत्वस्य निरुक्तव्यापकतानवच्छेदकत्वादित्येव परमार्थः ॥ ४ ॥ साध्यवदन्येति । अत्रापि प्रथमलक्षणोक्तरीत्या हेतौ साध्यवदन्यवृत्तित्वस्याभाव इत्यर्थः । तादृशवृत्तित्वाभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः । तेन धूमवान्वन्हेरित्यादौ धूमवदन्यजलहृदादिवृत्तित्वाभावस्य धूमवदन्यवृत्तित्वजलत्वोभयाभावस्य च हेतौ सत्वेपि नातिव्याप्तिः । साध्यवदन्यत्वं चान्योन्याभावत्वानिरूपितसाध्यवत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं, तेन वान्हिमान् धूमादित्यादौ तत्तद्वान्हिमदन्यस्मित् धूमादेर्वृत्तावपि नाव्याप्तिर्न वा वान्हिमत्वावच्छिन्नप्रतियोगिताकात्यंताभावस्य स्वावच्छिन्नभेदरूपस्याधिकरणे पर्वतादौ धूमस्य वृत्तावप्यव्याप्तिः। तस्यास्साध्यवत्वावच्छिन्नप्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वेनान्योन्याभावत्वानिरूपितत्वविरहात् अन्योन्याभावानिरूपितत्वं च तादात्म्यसंबंधावच्छिन्नत्वमेव। साध्यवत्वं च

साध्यतावच्छेदकसंबंधेन बोध्यम्। तेन वन्हिमान्धूमादित्यादौ वन्हिमत्वावच्छिन्नप्रतियोगिताकस्य समवायेन वन्हिमतोऽन्योन्याभावस्याधिकरणे पर्वतादौ धूमादेर्वृत्तावपि नाव्याप्तिः। सर्वमन्यत्प्रथमलक्षणोक्तदिशावसेयम् । यथा च न तृतीयलक्षणाभेदस्तथोक्तं तत्रैवेति समासः। सर्वाण्येव लक्षणानि केवलान्वय्यव्याप्त्या दूषयति। केवलान्वय्यभावादिति। पंचानामेव लक्षणानामिदं वाच्यं ज्ञेयत्वादित्यादिव्याप्यवृत्तिकेवलान्वयिसाध्यके द्वितीयादिलक्षणचतुष्टयस्य तु कपिसंयोगाभाववान्सत्वादित्याद्यव्याप्यवृत्तिकेवलान्वयिसाध्यकेपि चाभावादित्यर्थः। साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्य साध्यतावच्छेदकसंबंधेन साध्यवत्वावाच्छिन्नप्रतियोगिताकान्योन्याभावस्य चाप्रसिद्धत्वात् कपिसंयोगाभाववान् सत्वादित्यादौ निरवच्छिन्नसाध्याभाववत्वस्याप्रसिद्धत्वादिति भावः। तृतीयलक्षणस्य केवलान्वयिसाध्यकासत्वं च तद्व्याख्यानावसरएव प्रपंचितम् । एतच्चोपलक्षणं द्वितीये कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः अधिकरणाभेदेनाभावभेदे मानाभावेन कपिसंयोगवाद्भिन्नवृत्तिकपिसंयोगाभावो द्रव्यवृत्तिकपिसंयोगाभाव एव तद्वृत्तित्वादेतद्वृक्षत्वस्य, तृतीये साध्यवद्वृत्तिप्रतियोगिकान्योन्याभावमात्रस्य घटकत्वचालनीन्यायेनान्योन्याभावमादाय नानाधिकरणसाध्यके वन्हिमान्धूमादित्यादावव्याप्तिश्चेत्यपि बोध्यम् ॥ इति व्याप्तिपञ्चकरहस्यम् ॥

माथुरी पञ्चलक्षणी समाप्ता ॥

अथ सिंहव्याघ्रचिन्तामणिः ॥

नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधिकरण्याधिकरणत्वं वा तदुभयमपि साध्यानधिकरणानधिकरणत्वं तच्च तत्र यत्किञ्चित्साध्यानधिकरणानधिकरणे धूमे चाप्रसिद्धमिति ॥

नापीति ॥ अत्र साध्यस्यासामानाधिकरण्यं न साध्याधिकरणवृत्तित्वाभावः द्रव्यं सत्वादित्यादावतिव्याप्त्यापत्तेः द्रव्यत्वाधिकरणवृत्तित्वाभावानधिकरणत्वात् सत्तायां नापि साध्यवद्भिन्नवृत्तित्वं, द्वितीयेन पौनरुक्त्यापत्तेः किं तु साध्याधिकरणत्वाभाववद्वृत्तित्वं, तदनधिकरणत्वं च तद्भिन्नत्वं, अधिकरणत्वप्रवेशे प्रयोजनविरहात् तथा च साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वहेतोरव्यभिचरितत्वमिति फलितम् । अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणायाधिकरणत्वप्रवेशः।अव्याप्यवृत्तेरधिकरणता तु नाव्याप्यवृत्तिः । साध्याधिकरणत्वं च साध्यतावच्छेदकावच्छिन्नं साध्यतावच्छेदकसंबंधावच्छिन्नं च ग्राह्यम् । अन्यथा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ सत्ताया एव साध्यत्वेन साध्याधिकरणत्वाभाववत्सामान्याद्येव तद्वृत्तित्वाज्जातेरव्याप्तिः स्यात् स्याच्च समवायेन वन्ह्यादौ साध्ये संयोगेन धूमादिहेतावतिव्याप्तिः । वन्ह्यधिकरणत्वाभाववज्जलह्रदाद्येव तद्वृत्तित्वाद्धूमादेः।इत्थं च साध्यता-

वच्छेदकविशिष्टसत्तात्वावच्छिन्नसाध्याधिकरणत्वाभाववद्
गुणादि तद्वृत्तित्वाज्जातेः साध्यतावच्छेदकसमवायसंबन्धा-
वच्छिन्नवन्ह्यधिकरणत्वाभाववत्पर्वताद्यपि धूमस्य तद्वृत्ति-
त्वन्नातिव्याप्तिः। वृत्तिश्च हेतुतावच्छेदकसंबन्धेन बोध्या, तेन
तादृशवन्ह्यधिकरणत्वाभाववति धूमावयवे समवायेन धूम-
स्य वृत्तावपि न क्षतिः। न चैवं सत्तावान् द्रव्यत्वादित्यादा-
वव्याप्तिः सत्ताधिकरणत्वाभाववति सामान्यादौ हेतुताव-
च्छेदकसमवायसम्बन्धेन वृत्तेरेवाप्रसिद्धेरिति वाच्यम्। तादृ-
शसाध्याधिकरणत्वाभावव्यापकान्योन्याभावप्रतियोगिताव-
च्छेदकत्वमिति विवक्षितत्वात्। साध्याधिकरणत्वाभावसा-
मानाधिकरण्येत्युक्तौ धूमवान्वन्हेरित्यादौ धूमाधिकरणत्वा-
भाववति जलहृदादौ वन्हिमदन्योन्याभावसत्वादातिव्याप्ति-
रतो व्यापकत्वानुधावनं, अन्योन्याभावप्रतियोगितावच्छेद-
कत्वं हेतुतावच्छेदकसंबंधावच्छिन्नं हेतुतावच्छेदकावच्छि-
न्नं च ग्राह्यम्। अन्यथा वन्हिमान् धूमादित्यादौ वन्ह्य-
धिकरणत्वाभाववति धूमावयवे धूमवदन्योन्याभावासत्वा-
दव्याप्तिः स्यात्, स्याच्च द्रव्यं जातेरित्यादौ घटत्वपटत्वा-
दितत्तज्जातिमतोन्योन्याभावस्य द्रव्यत्वाधिकरणत्वाभा-
वव्यापकत्वेनातिव्याप्तिः। अव्याप्यवृत्तिमतोन्योन्या-
भावस्तु नाव्याप्यवृत्तिरिति पृथिवीसंयोगादित्याद्यव्या-
प्यवृत्तिहेतुके व्यभिचारिणि नातिव्याप्तिरिति संक्षेपः॥
इति प्रथमलक्षणं समाप्तम्॥ साध्यवैयधिकरण्यमिति।
साध्यवैयधिकरण्यं साध्यवद्भिन्नवृत्तित्वं साध्यवदवृत्तित्व-
परत्वे द्रव्यं सत्वादित्यादावतिव्याप्तिः। अव्याप्यवृ-

त्तिमतो ऽन्योन्याभावस्तु नाव्याप्यवृत्तिरित्यव्याप्यवृत्ति-
साध्यकसद्धेतौ नाव्याप्तिः । अनधिकरणत्वमित्यत्राधि-
करणत्वांशस्याधिकस्य प्रवेशान्न साध्यवदन्यावृत्तित्वमित्य-
नेन यथाश्रुतस्य पौनरुक्त्यं अखंडाभावघटकतया चा-
धिकरणत्वांशस्य न वैयर्थ्यम् । साध्यवद्भिन्नत्वं च सा-
ध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्र-
तियोगितावच्छेदकताकं बोध्यम् । तेन वन्हिमान् धूमा-
दित्यादौ धूमस्य समवायेन वन्हिमतो भिन्ने यत्किंचित्सा-
ध्यवद्व्यक्तिभिन्ने च पर्वतादौ वृत्तित्वेपि न क्षतिः । ता-
दृशसाध्यवद्भिन्नत्वव्यापकान्योन्याभावप्रतियोगितावच्छेद-
कत्वमिति तु समुदायार्थनिष्कर्षः । अन्यथा पूर्ववत्सा-
ध्यवद्भिन्नवृत्तिकत्वमित्यत्र वृत्तेर्हेतुतावच्छेदकसम्बन्धेनैव
वाच्यतया सत्तावान् द्रव्यत्वादित्यादावव्याप्त्यापत्तेः ।
शेषं पूर्ववत् । लक्षणद्व्यमेकदैव दूषयति । तदुभयम-
पीति । साध्यानधिकरणानाधिकरणत्वं साध्यानधिकरणा-
नाधिकरणत्वानियतं साध्यानधिकरणावृत्तित्वव्याप्यमिति
यावत् । तच्च व्यापकीभूतं साध्यानधिकरणावृत्तित्वं च
तत्र केवलान्वयिसाध्यके ऽप्रसिद्धमित्यन्वयः । साध्या-
नधिकरणत्वस्य साध्याधिकरणत्वावच्छिन्नप्रतियोगिता-
कभेदवत्वस्य तत्राप्रसिद्धेः । यत्किंचिदिति । यदि च
साध्यानाधिकरणत्वं न तत्सामान्यभेदः किं तु साध्याधि-
करणप्रतियोगिताकभेदवत्वमात्रं तदा वन्हिमान् धूमादि-
त्यत्र यत्किंचिद्वन्ह्यनधिकरणे पर्वतादौ वर्तमाने धूमेप्यप्र-
सिद्धमित्यर्थः । अप्यर्थकचकारात्केवलान्वयिसाध्यकस-

मुच्चयः । तथा च व्यापकाभावाद्व्याप्यीभूतं तदुभयलक्षणमपि तदुभयत्राप्रसिद्धमिति भावः । साध्यानधिकरणानधिकरणत्वमिति यथाश्रुतं तु न संगच्छते यथोक्तलक्षणद्वयस्य तत्स्वरूपत्वाभावादिति ध्येयम् । भट्टाचार्यानुयायिनस्तु, तदुभयमपि, तदुभयलक्षणवाक्यमपि । साध्यानधिकरणानाधिकरणत्वम्, साध्यानधिकरणानधिकरणत्वबोधजनकम् । साध्याधिकरणत्वसामान्याभाववद्वृत्तित्वाभावसाध्यवत् । सामान्यभिन्नवृत्तित्वाभावान्यतरबोधजनकामिति यावत् । तच्च तादृशान्यतराभाववत्वं च तत्र केवलान्वयिसाध्यके ऽप्रसिद्धमित्यन्वयः । साध्याधिकरणत्वसामान्याभावादेरप्रसिद्धत्वादिति भावः । ननु तदुभयवाक्यं न प्रागुक्ताभावान्यतरविषयबोधजनकमपि साध्याधिकरणत्वप्रतियोगिकाभाववद्वृत्तित्वसामान्याभावसाध्यवत् प्रतियोगिकभेदवद्वृत्तित्वसामान्याभावान्यतरबोधजनकमेव । साध्याधिकरणत्वप्रतियोगिकाभावसाध्यवत्प्रतियोगिकभेदौ च केवलान्ययिन्यपि प्रसिद्धावित्यत आह । यत्किंचिदिति । शेषं पूर्ववदित्याहुः ॥

इति शशिधरमणिधरलक्षणव्याख्या ॥

समाप्तौ सिंहव्याघ्रौ ॥

विक्रीके पुस्तकों की सूची ।

श्रीमत्पतञ्जलिकृत संपूर्ण व्याकरण महाभाष्य कैयटकृत प्रदीप, नवान्हिक भाष्योद्द्योत और श्रीमद्‌विद्वद्वर बालशास्त्रिकृत टिप्पणी सहित १०)

श्रीभगवत्पतञ्जलिकृत महाभाष्य का नवान्हिक, कैयटकृत प्रदीप, भाष्योद्द्योत नामकटीका और श्रीमद्‌बालशास्त्रिकृत टिप्पणी सहित २)

नागोजीभट्ट कृत परमलघुमञ्जूषा ॥)

कौण्डभट्ट कृत वैयाकरणभूषणसार ॥)

श्रीगदाधर भट्टाचार्य कृत प्रतिबन्धकतावाद ।)

श्रीनागोजीभट्ट कृत लघुशब्देन्दुशेखरसंपूर्ण (टाइप्) ५)

दिनकरी मुक्तावली की टीका १।)

नवान्हिक विवरण १)

विवरण दो अध्यायका (टाइप्) ३)

अमरुशतक वेदान्त और शृंगार पर टीका सहित ॥=)

कारिकावली मुक्तावली दिनकरी रामरुद्री सहित २)

प्रायश्चित्तशूलपाणि २)

लघुत्रिस्थलीसेतु ।)

तन्त्राधिकार निर्णय, भट्टोजीदीक्षित कृत, इस में तप्तमुद्राधारणादि अनेक पाखण्ड मत का खण्डन है । ।=).

सरस्वती कण्ठाभरण । इस ग्रंथ से श्लोक तथा बन्ध बनाना आता है । ४)

लघुशब्देन्दुशेखर (अव्ययीभावान्त) १)

गङ्गास्थितिनिर्णय [गङ्गाजीके न जानेकी व्यवस्था] =)

काशिका [अइउणादि चतुर्दशसूत्रव्याख्या] =)

परिभाषेन्दुशेखर भूतिनामकबृहट्टीकासहित [इस टीका-में सब परिष्कार और क्रोड हैं] ८)

संस्कृतसोपान [इस्को पढनेसे अनायाससे संस्कृत बोलना आसक्ता है] ॥)

व्युत्पत्तिवाद [बम्बई टाईप्] १॥)

वास्तुरत्नावली । ॥।)

संकल्पकल्पना । इसमें सब वृतों के संकल्पादि हैं ॥)

देवीगीता सटीक (मन्त्रशास्त्र) १)

कर्पूरस्तवराज सटीक " ।=)

दीक्षातत्त्व प्रकाश " १।)

कालीपञ्चाङ्ग " ॥)

शारदातिलक राघवभट्टी नामक बृहट्टीका सहित ४)

किरातार्जुनीय सटीक [पहिले तीनसर्ग] बम्बई टाईप् ।)

अवच्छेदकत्वनिरुक्ति ≡)

जगद्विख्यातपण्डितवर श्रीबालशास्त्री जीका जीवन वृत्तान्त । इसमें शास्त्री जी के जीवनभर का कुल हाल हिन्दी में लिखा है । ≡)

काशी के प्रसिद्ध ज्योतिर्विद् महामहोपाध्याय पं० बापूदेव शास्त्री सि. आई. ई. का हिन्दी भाषा में जीवन वृत्तान्त ≡)

इस से अन्य जो २ पुस्तक अपेक्षित हों वे नीचे लिखे हुए पते से मंगा लीजिये । आध आने का टिकट आने से बडा सूची पत्र मुफ्त भेजा जायगा ।

मैनेजर, राजराजेश्वरी प्रेस,

दुर्गाघाट, काशी ।